श्री दुर्गा स्तोत्रं (परशुराम कृतं)

श्री दुर्गा स्तोत्रं (परशुराम कृतं)

परशुराम उवाच |
श्रीकृष्णस्य च गोलोके परिपूर्णतमस्य च |
आविर्भूता विग्रहतः पुरा सृष्ट्युन्मुखस्य च || 1 ||

सूर्यकोटिप्रभायुक्ता वस्त्रालंकारभूषिता |
वह्निशुद्धांशुकाधाना सस्मिता सुमनोहरा || 2 ||

नवयौवनसंपन्ना सिंदूरारुण्यशोभिता |
ललितं कबरीभारं मालतीमाल्यमंडितं || 3 ||

अहोऽनिर्वचनीया त्वं चारुमूर्तिं च बिभ्रती |
मोक्षप्रदा मुमुक्षूणां महाविष्णुर्विधिः स्वयं || 4 ||

मुमोह क्षणमात्रेण दृष्ट्वा त्वां सर्वमोहिनीं |
बालैः संभूय सहसा सस्मिता धाविता पुरा || 5 ||

सद्भिः ख्याता तेन राधा मूलप्रकृतिरीश्वरी |
कृष्णस्तां सहसा भीतो वीर्याधानं चकार ह || 6 ||

ततो डिंभं महज्जज्ञे ततो जातो महाविराट् |
यस्यैव लोमकूपेषु ब्रह्मांडान्यखिलानि च || 7 ||

राधारतिक्रमेणैव तन्निःश्वासो बभूव ह |
स निःश्वासो महावायुः स विराड्विश्वधारकः || 8 ||

भयधर्मजलेनैव पुप्लुवे विश्वगोलकं |
स विराड्विश्वनिलयो जलराशिर्बभूव ह || 9 ||

ततस्त्वं पंचधा भूय पंचमूर्तीश्च बिभ्रती |
प्राणाधिष्ठातृमूर्तिर्या कृष्णस्य परमात्मनः || 10 ||

कृष्णप्राणाधिकां राधां तां वदंति पुराविदः |
वेदाधिष्ठातृमूर्तिर्या वेदाशास्त्रप्रसूरपि || 11 ||

तां सावित्रीं शुद्धरूपां प्रवदंति मनीषिणः |
ऐश्वर्याधिष्ठातृमूर्तिः शांतिस्त्वं शांतरूपिणी || 12 ||

लक्ष्मीं वदंति संतस्तां शुद्धां सत्त्वस्वरूपिणीं |
रागाधिष्ठातृदेवी या शुक्लमूर्तिः सतां प्रसूः || 13 ||

सरस्वतीं तां शास्त्रज्ञां शास्त्रज्ञाः प्रवदंत्यहो |
बुद्धिर्विद्या सर्वशक्तेर्या मूर्तिरधिदेवता || 14 ||

सर्वमंगळदा संतो वदंति सर्वमंगळां |
सर्वमंगळमंगळ्या सर्वमंगळरूपिणी || 15 ||

सर्वमंगळबीजस्य शिवस्य निलयेऽधुना |
शिवे शिवास्वरूपा त्वं लक्ष्मीर्नारायणांतिके || 16 ||

सरस्वती च सावित्री वेदसूर्ब्रह्मणः प्रिया |
राधा रासेश्वरस्यैव परिपूर्णतमस्य च || 17 ||

परमानंदरूपस्य परमानंदरूपिणी |
त्वत्कलांशांशकलया देवानामपि योषितः || 18 ||

त्वं विद्या योषितः सर्वाः सर्वेषां बीजरूपिणी |
छाया सूर्यस्य चंद्रस्य रोहिणी सर्वमोहिनी || 19 ||

शची शक्रस्य कामस्य कामिनी रतिरीश्वरी |
वरुणानी जलेशस्य वायोः स्त्री प्राणवल्लभा || 20 ||

वह्नेः प्रिया हि स्वाहा च कुबेरस्य च सुंदरी |
यमस्य तु सुशीला च नैर्ऋतस्य च कैटभी || 21 ||

ऐशानी स्याच्छशिकला शतरूपा मनोः प्रिया |
देवहूतिः कर्दमस्य वसिष्ठस्याप्यरुंधती || 22 ||

लोपामुद्राऽप्यगस्त्यस्य देवमाताऽदितिस्तथा |
अहल्या गौतमस्यापि सर्वाधारा वसुंधरा || 23 ||

गंगा च तुलसी चापि पृथिव्यां याः सरिद्वरा |
एताः सर्वाश्च या ह्यन्या सर्वास्त्वत्कलयांबिके || 24 ||

गृहलक्ष्मीर्गृहे नृणां राजलक्ष्मीश्च राजसु |
तपस्विनां तपस्या त्वं गायत्री ब्राह्मणस्य च || 25 ||

सतां सत्त्वस्वरूपा त्वमसतां कलहांकुरा |
ज्योतिरूपा निर्गुणस्य शक्तिस्त्वं सगुणस्य च || 26 ||

सूर्ये प्रभास्वरूपा त्वं दाहिका च हुताशने |
जले शैत्यस्वरूपा च शोभारूपा निशाकरे || 27 ||

त्वं भूमौ गंधरूपा चाप्याकाशे शब्दरूपिणी |
क्षुत्पिपासादयस्त्वं च जीविनां सर्वशक्तयः || 28 ||

सर्वबीजस्वरूपा त्वं संसारे साररूपिणी |
स्मृतिर्मेधा च बुद्धिर्वा ज्ञानशक्तिर्विपश्चितां || 29 ||

कृष्णेन विद्या या दत्ता सर्वज्ञानप्रसूः शुभा |
शूलिने कृपया सा त्वं यया मृत्युंजयः शिवः || 30 ||

सृष्टिपालनसंहारशक्तयस्त्रिविधाश्च याः |
ब्रह्मविष्णुमहेशानां सा त्वमेव नमोऽस्तु ते || 31 ||

मधुकैटभभीत्या च त्रस्तो धाता प्रकंपितः |
स्तुत्वा मुक्तश्च यां देवीं तां मूर्ध्ना प्रणमाम्यहं || 32 ||

मधुकैटभयोर्युद्धे त्राताऽसौ विष्णुरीश्वरीं |
बभूव शक्तिमान् स्तुत्वा तां दुर्गां प्रणमाम्यहं || 33 ||

त्रिपुरस्य महायुद्धे सरथे पतिते शिवे |
यां तुष्टुवुः सुराः सर्वे तां दुर्गां प्रणमाम्यहं || 34 ||

विष्णुना वृषरूपेण स्वयं शंभुः समुत्थितः |
जघान त्रिपुरं स्तुत्वा तां दुर्गां प्रणमाम्यहं || 35 ||

यदाज्ञया वाति वातः सूर्यस्तपति संततं |
वर्षतींद्रो दहत्यग्निस्तां दुर्गां प्रणमाम्यहं || 36 ||

यदाज्ञया हि कालश्च शश्वद्भ्रमति वेगतः |
मृत्युश्चरति जंतूनां तां दुर्गां प्रणमाम्यहं || 37 ||

स्रष्टा सृजति सृष्टिं च पाता पाति यदाज्ञया |
संहर्ता संहरेत्काले तां दुर्गां प्रणमाम्यहं || 38 ||

ज्योतिःस्वरूपो भगवान् श्रीकृष्णो निर्गुणः स्वयं |
यया विना न शक्तश्च सृष्टिं कर्तुं नमामि तां || 39 ||

रक्ष रक्ष जगन्मातरपराधं क्षमस्व मे |
शिशूनामपराधेन कुतो माता हि कुप्यति || 40 ||

इत्युक्त्वा परशुरामश्च नत्वा तां च रुरोद ह |
तुष्टा दुर्गा संभ्रमेण चाभयं च वरं ददौ || 41 ||

अमरो भव हे पुत्र वत्स सुस्थिरतां व्रज |
शर्वप्रसादात्सर्वत्र जयोऽस्तु तव संततं || 42 ||

सर्वांतरात्मा भगवांस्तुष्टः स्यात्संततं हरिः |
भक्तिर्भवतु ते कृष्णे शिवदे च शिवे गुरौ || 43 ||

इष्टदेवे गुरौ यस्य भक्तिर्भवति शाश्वती |
तं हंतुं न हि शक्ता वा रुष्टा वा सर्वदेवताः || 44 ||

श्रीकृष्णस्य च भक्तस्त्वं शिष्यो वै शंकरस्य च |
गुरुपत्नीं स्तौषि यस्मात्कस्त्वां हंतुमिहेश्वरः || 45 ||

अहो न कृष्णभक्तानामशुभं विद्यते क्वचित् |
अन्यदेवेषु ये भक्ता न भक्ता वा निरंकुशाः || 46 ||

चंद्रमा बलवांस्तुष्टो येषां भाग्यवतां भृगो |
तेषां तारागणा रुष्टाः किं कुर्वंति च दुर्बलाः || 47 ||

यस्मै तुष्टः पालयति नरदेवो महान्सुखी |
तस्य किं वा करिष्यंति रुष्टा भृत्याश्च दुर्बलाः || 48 ||

इत्युक्त्वा पार्वती तुष्टा दत्त्वा रामाय चाशिषं |
जगामांतःपुरं तूर्णं हरिशब्दो बभूव ह || 49 ||

स्तोत्रं वै काण्वशाखोक्तं पूजाकाले च यः पठेत् |
यात्राकाले तथाप्रातर्वांछितार्थं लभेद्ध्रुवं || 50 ||

पुत्रार्थी लभते पुत्रं कन्यार्थी कन्यकां लभेत् |
विद्यार्थी लभते विद्यां प्रजार्थी चाप्नुयात्प्रजाः || 51 ||

भ्रष्टराज्यो लभेद्राज्यं नष्टवित्तो धनं लभेत् |
यस्य रुष्टो गुरुर्देवो राजा वा बांधवोऽथवा || 52 ||

तस्य तुष्टश्च वरदः स्तोत्रराजप्रसादतः |
दस्युग्रस्तः फणिग्रस्तः शत्रुग्रस्तो भयानकः || 53 ||

व्याधिग्रस्तो भवेन्मुक्तः स्तोत्रस्मरणमात्रतः |
राजद्वारे श्मशाने च कारागारे च बंधने || 54 ||

जलराशौ निमग्नश्च मुक्तस्तत् स्मृतिमात्रतः |
स्वामिभेदे पुत्रभेदे मित्रभेदे च दारुणे || 55 ||

स्तोत्रस्मरणमात्रेण वांछितार्थं लभेद्ध्रुवं |
कृत्वा हविष्यं वर्षं च स्तोत्रराजं शृणोति या || 56 ||

भक्त्या दुर्गां च संपूज्य महावंध्या प्रसूयते |
लभते सा दिव्यपुत्रं ज्ञानिनं चिरजीविनं || 57 ||

असौभाग्या च सौभाग्यं षण्मासश्रवणाल्लभेत् |
नवमासं काकवंध्या मृतवत्सा च भक्तितः || 58 ||

स्तोत्रराजं या शृणोति सा पुत्रं लभते ध्रुवं |
कन्यामाता पुत्रहीना पंचमासं शृणोति या |
घटे संपूज्य दुर्गां च सा पुत्रं लभते ध्रुवं || 59 ||

इति श्रीब्रह्मवैवर्ते महापुराणे गणपतिखंडे नारदनारायणसंवादे पंचचत्वारिंशोऽध्याये परशुरामकृत दुर्गा स्तोत्रं |